## ऋतो ङिसर्वनामस्थानयोः । (११०/२७७)

गुणः इति वर्तते । ऋकारान्तस्याङ्गस्य ङौ परतः सर्वनामस्थाने च गुणो भवति । ङौ – मातरि । [1]पितरि । भ्रातरि । कर्तरि । सर्वनामस्थाने – कर्तारौ । कर्तारः । मातरौ । पितरौ । भ्रातरौ । तपरकरणं मुखसुखार्थम् ॥

## घेर्ङिति । (१११/२४७)

घ्यन्तस्याङ्गस्य ङिति प्रत्यये परतो गुणो भवति । अग्नये । वायवे । अग्नेरागच्छति । वायोरागच्छति । अग्नेः स्वम् । वायोः स्वम् । घेः इति किम् ? सख्ये । पत्ये । ङिति इति किम् ? [2]अग्निभ्याम् । सुपि इत्येव, पट्वी । कुरुतः ॥

## आण्नद्याः । (११२/२६८)

नद्यन्ता[3]दङ्गादुत्तरस्य ङितः प्रत्ययस्य आडागमो भवति । कुमार्यै । ब्रह्मबन्ध्वै । कुमार्याः । ब्रह्मबन्ध्वाः ॥

## याडापः । (११३/२९०)

आबन्तादङ्गादुत्तरस्य ङितः प्रत्ययस्य याडागमो भवति । खट्वायै । बहुराजायै । कारीषगन्ध्यायै । खट्वायाः । कारीषगन्ध्यायाः । बहुराजायाः । अतिखट्वाय इत्यत्र अकृते दीर्घे ङ्याब्ग्रहणे अदीर्घः इति वचनाद याडागमो न भवति, कृते तु लाक्षणिकत्वात् ॥

## सर्वनाम्नः स्याड्ढ्रस्वश्च । (११४/२९१)

सर्वनाम्नः आबन्तादङ्गादुत्तरस्य ङितः प्रत्ययस्य स्याट् आगमो[4] ह्रस्वश्च भवति[5] । सर्वस्यै । विश्वस्यै । [6]यस्यै । तस्यै । कस्यै । अन्यस्यै । सर्वस्याः । विश्वस्याः । यस्याः । तस्याः । कस्याः । अन्यस्याः । आपः इत्येव, भवति । भवते[7] ॥

## विभाषा द्वितीयातृतीयाभ्याम् । (११५/२९३)

द्वितीया तृतीया इत्येताभ्यामुत्तरस्य ङितः [8]प्रत्ययस्य विभाषा स्याट् [9]आगमो भवति, द्वितीयातृतीययोश्च ह्रस्वो[10] भवति । द्वितीयस्यै, द्वितीयायै । तृतीयस्यै, तृतीयायै ॥

## ङेराम् नद्याम्नीभ्यः । (११६/२७०)

नद्यन्तात् आबन्तात् नी इत्येतस्माच्चोत्तरस्य ङेः आम् [11]आदेशो भवति । [12]कुमार्याम् । गौर्याम् । ब्रह्मबन्ध्वाम् । धीबन्ध्वाम् । आपः – खट्वायाम् । बहुराजायाम् । कारीषगन्ध्यायाम् । नी – राजन्याम् । सेनान्याम् ॥

---

1. पितरि नास्ति इ. 2. अग्निना वायुना ह. 3. अङ्गात् नास्ति इ. 4. भवति इत्यधिकम् ब.ड.इ. 5. सर्वनाम्नः इत्यधिकम् ड. ई. 6. अमुष्यै इत्यधिकम् इ. 7. भवत्यै भवत्याः इत्यधिकम् इ. 8. प्रत्ययस्य नास्ति क. ई. 9. आगमो नास्ति ई. 10. अपि इत्यधिकम् इ. 11. प्रत्ययः ब. 12. किशोर्याम् शार्ङ्गरव्याम् इत्यधिकम् ई.